## शुभ्रादिभ्यश्च । (१२३/११२६)

शुभ्र इत्येवमादिभ्यः प्रातिपदिकेभ्यः ढक् प्रत्ययो भवति । यथायोगम् इञादीनामपवादः । शौभ्रेयः । वैष्टपुरेयः । चकारोऽनुक्तसमुच्चयार्थः आकृतिगणतामस्य बोधयति, तेन गाङ्गेयः, पाण्डवेयः इत्येवमादि सिद्धं भवति ।

शुभ्र । विष्टपुर । ब्रह्मकृत । शतद्वार । शतावर । शलाका । शालाचल । शलाकाभ्रू । लेखाभ्रू । विमातृ । विधवा । किंकसा । रोहिणी । रुक्मिणी । दिशा । शालूक । अजबस्ति । शकन्धि । 'लक्ष्मणश्यामयोर्वासिष्ठे' (ग.सू. ७८) । गोधा । कृकलास । अणीव । प्रवाहण । भरत । [1]भारम । मुकण्डु । मघष्टु । मकष्टु । कर्पूर । इतर । अन्यतर । आलीढ । सुदत्त । सुचक्षस् । [2]सुनामन् । कद्रु । तुद । अकशाप । [3]कुमारिका । किशोरिका । कुवेणिका । जिह्माशिन् । परिधि । वायुदत्त । ककल । खट्वा । अम्बिका । अशोका । शुद्धपिङ्गला । खडोन्मत्ता । अनुदृष्टि । जरतिन् । बालवर्दिन् । विग्रज । वीज । श्वन् । अश्मन् । अश्व । अजिर ॥

## विकर्णकुषीतकात् काश्यपे । (१२४/११२७)

विकर्णशब्दात् कुषीतकशब्दाच्च काश्यपेऽपत्यविशेषे ढक् प्रत्ययो भवति । वैकर्णेयः । कौषीतकेयः । काश्यपे इति किम् ? वैकर्णिः । कौषीतकिः ॥

## भ्रुवो वुक् च । (१२५/११३०)

भ्रूशब्दादपत्ये ढक् प्रत्ययो भवति, तत्सन्नियोगेन [4]च वुगागमः । भ्रौवेयः ॥

## कल्याण्यादीनामिनङ् । (१२६/११३१)

कल्याणी इत्येवमादीनां शब्दानामपत्ये ढक् प्रत्ययो भवति, तत्संनियोगेन च इनङादेशः । स्त्रीप्रत्ययान्तानामादेशार्थं ग्रहणं, प्रत्ययस्य सिद्धत्वाद् । अन्येषामुभयार्थम् । काल्याणिनेयः । सौभागिनेयः । दौर्भागिनेयः । 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' (७.३.१९/११३३) इत्युभयपदवृद्धिः ।

[5]कल्याणी । सुभगा । दुर्भगा । बन्धकी । अनुदृष्टि । अनुसृष्टि । जरती । बलीवर्दी । ज्येष्ठा । कनिष्ठा । मध्यमा । परस्त्री ॥

## कुलटाया वा । (१२७/११३२)

कुलान्यटति इति कुलटा । पररूपं निपातनात् । [6]कुलटायाः अपत्ये ढक् प्रत्ययो भवति, तत्सन्नियोगेन च वा इनङ आदेशो भवति । आदेशार्थं वचनं, प्रत्ययश्च पूर्वेणैव सिद्धः । कौलटिनेयः, [7]कौलटेयः । या तु[8] कुलान्यटन्ती शीलं भिनत्ति, ततः 'क्षुद्राभ्यो वा' (४.१.१३१/११३७) इति परत्वाड् ढ्रका भवितव्यम् । कौलटेरः ॥

---

1. भारत फ. 2. सुदामन् फ. 3. कुवारिका फ, कुरेका न्या. 4. च नास्ति फ. 5. काल्याणिनेयः । सौभागिनेयः । दौर्भागिनेयः । बान्धकिनेयः । आनुदृष्टिनेयः । आनुसृष्टिनेयः । जारतिनेयः । बालीवर्दिनेयः । ज्यैष्ठिनेयः । कानिष्ठिनेयः । माध्यमिनेयः । पारस्त्रैणेयः ग. 6. कुलटाशब्दात् फ. 7. भिक्षार्थं कुलान्यटन्त्या एवम् इत्यधिकम् ग. 8. व्यभिचारार्थम् इत्यधिकम् फ.